शूद्राणान्तु विशेषतः। भीता दृष्टा याति लक्ष्मीः स्थल-मन्यत् स्थलान्ततः” १०मुद्राभेदे तन्त्रसा०।

११प्रस्तरभेदे। युक्तिकल्पतरौ तल्लक्षणादि यथा “क्षीरोदकूलेऽपि सुराष्ट्रदेशे तदन्यतोऽपि प्रभवन्ति शङ्खाः। अरुष्कवर्णाः शशिशुभ्रभासः सुसूक्ष्मवक्त्रा गुरवो महान्तः। ते वामदक्षिणावर्त्तभेदेन द्विविधा मताः। दक्षिणावर्त्तशङ्खस्तु कुर्य्यादायुर्यशोधनम्। तेनैव शिरसा यस्तु श्रद्दधानः प्रतीच्छति। वारि हित्वा स पापानि पुण्यमाप्नोति मानवः। वृत्तत्वं स्निग्धताच्छत्वं शङ्खस्येति गुणत्रयम्। आवर्त्तभङ्गदोषो हि हेमयागादिनश्यति। ब्रह्मादिजातिभेदेन स पुनश्चतुर्विधः”।

“ये स्निग्धमसृणाकारा मृदवो लघवस्तथा। ब्राह्मणाः प्रस्तरा ज्ञेयाः सर्वकर्मसु शोभनाः। ये दृढाङ्गाः सुगुरवश्चांशांशविभागिनः। अश्मानः क्षत्रिया ज्ञेयाः कर्कशाङ्गास्तथैव च। मृदवो गुरवो ये तु ये स्नेहेनैव रञ्जिताः। ते वैश्याः सविभक्तांशा युज्यन्ते सर्वकर्मसु। ये कर्कशाहताङ्गाश्च कर्कशा ये प्रतिष्ठिताः। येऽत्यन्तगुरवः स्निग्धास्ते शूद्राः प्रस्तराधमाः। इति प्रोक्तमशेषेण सम्यक् पाषाणलक्षणम्। विचार्य्य मतिमान् कार्य्ये नियोक्तव्यं विचक्षणैः”।

**शङ्खक** न० शङ्खस्य विकारः वुन्। १शङ्खजाते वलयाकारे पदार्थे मेदिनि० २शिरोरोगे पु० तस्य लक्षणादि यथा “पित्तरक्तानिलादुष्टाः शङ्खदेशे विमूर्च्छिताः। तीव्ररुग्दाहरोगं हि शोथं कुर्वन्ति दारुणम्। सशिरोविषवद्वेगान्निरुध्याशु गलं तथा। त्रिरात्राज्जीवितं हन्ति शङ्खको नाम नामतः। त्र्यहाज्जीवितभैषज्यं प्रत्याख्येयस्य कारयेत्”। पित्तरक्तानिला इत्यत्र कफोऽपि योज्यः “क्षतानुतापः कफपित्तरक्तैरिति” सुश्रुतवचनात्। विमूर्च्छिताः प्रवृद्धाः त्रिरात्रात् त्रिरात्रमध्ये मारयति” भावप्र०।

**शङ्खकार** पु० शङ्खं तद्विकारं वलयाकारं पदार्थं करोति कृ-अण्। वर्णसङ्करजातिभेदे (शाँखारी)। स तु शूद्रागर्भे विश्वकर्मतो जातः ब्रह्मवै०। [कायां त्रिका०।

**शङ्खचरी** स्त्री शङ्खे ललाटास्थ्नि चरति चर-ट। ललाटि-

**शङ्खचर्चा** स्त्री शङ्खस्य चर्चा भूषा यतः। ललाटिकायां शब्दर०। [कृष्णं क्रमिहरं परम्” राजव०।

**शङ्खचूर्ण** न० ६त०। शङ्खजाते चूर्णे। “शङ्खचूर्णं कटु क्षार·

**शङ्खद्रावक** पु० औषधविशेषे। तत्पाकादि यथा “अर्कस्नुही तथा चिञ्चा तिलारग्वधचित्रकम्। अपामार्गभस्मसमं वस्त्रपूतं जलं हरेत्। मृदग्निना पचेद्वत्स यावल्लवणतां गतम्। लवणेन समौ ग्राह्यौ द्वौ क्षारौ टङ्कणं तथा। समुद्रफेनगोदन्तकाशीशं सोरका तथा। द्विगुणं पञ्चलवणं मातुलुङ्गरसेन च। काचकूप्यान्तु सप्ताहं वासयेदम्लयोगतः। शङ्खचूर्णपलं दत्त्वा वारुणीयन्त्रमुद्धरेत्। सर्वधातून् हरेच्छीघ्रं वराटीशङ्खकादिकान्। उदरादिकरोगाणां सद्यो हि नाशकः परः” भैषज्यर० “योगिनीभैरवाभ्याञ्च बलिमादौ प्रदापयेत्। पश्चाद्यन्त्रञ्च कर्त्तव्यमेवाह परमेश्वरी। रसः शङ्खद्रवो नाम शम्भुदेवेन भाषितः। गुह्याद् गुह्यतमं गुह्यमिदानीं कथ्यते मया। शङ्खचूर्णं यवक्षारं सर्जिकाक्षारटङ्कणम्। समञ्च पञ्चलवणं स्फटिकारी नवादरः। काचकूप्यां ततः क्षिप्त्वा वारुणीयन्त्रमुद्धरेत्। यामार्द्धं द्रावयत्येष शङ्खशुक्तिवराटकान्। अर्शांसि नाशयेत् षट् च मूत्रकृच्छ्राश्मरीं तथा। उदराष्टविधं हन्ति गुल्मप्लीहोदराणि च। अजीर्णं नाशयेच्छीघ्रं ग्रहणीञ्च विसूचिकाम्। भुक्तशेषे च भोक्तव्यो माषमात्रो रसोत्तमः। क्षणमात्राद्भवेद् भस्म पुनर्भोजनमिच्छति। प्रत्यहं भोजनान्ते च संसेव्योऽयं रसोत्तमः। न रुजायां भयं क्वापि सत्यं सत्यं वदाम्यहम्। न देयं यस्य कस्यापि सदा गोप्यञ्च कारयेत्। रसः शङ्खद्रवो नाम वैद्यानामुपकारकः”।

**शङ्खद्राविन्** पु० शङ्खं द्रावयति द्रु-णिच्-णिनि। अम्लवेतसे राजनि०।

**शङ्खधरा** स्त्री धृ-अच् ६त०। हिलमोचिकायाम् रत्नमा०।

**शङ्खध्म** पु० शङ्खं धमति ध्मा-क। शङ्खवादके। क्विप्। शङ्खध्मा इत्यप्यत्र।

**शङ्खनख** पु० शङ्खस्य नख इव। १क्षुद्रशङ्खे (जोङ्कड़ा) अमरः। २नखीनामगन्धद्रव्ये शब्दर० स्त्रीत्वमपि तत्र ङीष्।

**शङ्खपुष्पी** स्त्री शङ्खस्य इव पुष्पमस्याः ङीष्। (शङ्खाली) वृक्षे राजनि०। “शङ्खपुष्पी तु तीक्ष्णोष्णा मेध्या कृमिविषापहा”। राजवल्लभः “शङ्खपुष्पी सरा मेध्या कृष्णा मानसरोगनुत्। रसायनी कषायोष्णा स्मृतिकान्तिबलाग्निदा। दोषापस्मारभूतास्त्रकुष्ठकृमिविषप्रणुत्” भावप्र०। [हेमच०।

**शङ्खभृत्** पु० शङ्खं बिभर्त्ति भृ-क्विप् तुक् च। विष्णौ